श्री रामजय ।

ओं नमो भगवते सामवेदाय

॥ अथ ब्राह्मणं प्रथमम् ॥

॥ छान्दोग्यमन्त्रब्राह्मणम् ॥

प्रथमः खण्डः

अदितेऽनुमन्यस्व ॥ (भाष्यकाराः)

अनुमतेऽनुमन्यस्व ॥ " "

सरस्वत्यनुमन्यस्व ॥ " "

देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय ।

दिव्यो गन्धर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाचं नः स्वदतु ॥ १ ॥

काम वेद ते नाम मदो नामासि, समानयामुं सुरा ते अभवत् ।

परमत्र जन्माग्ने तपसो निर्मितोऽसि स्वाहा ॥ २ ॥

इमं त उपस्थं मधुना संसृजामि प्रजापतेर्मुखमेतद्द्वितीयम् ।

तेन पुंसोऽभि भवासि सर्वानवशान् वशिन्यसि राज्ञि स्वाहा ॥ ३ ॥

अग्निं क्रव्यादमकृण्वन् गुहानाः स्त्रीणामुपस्थमृषयः पुराणाः ।

तेनाज्यमकृण्वंस्त्रैशृङ्गं त्वाष्ट्रं त्वयि तद्दधातु स्वाहा ॥ ४ ॥

या अकृन्तन्नवयन् या अतन्वत याश्च देव्यो अन्तानभितो ततन्थ ।

तास्त्वा देव्यो जरसा संव्ययन्त्वायुष्मतीदं परिधत्स्व वासः ॥ ५ ॥

परिधत्त धत्त वाससैनां शतायुषीं कृणुत दीर्घमायुः ।
शतञ्च जीव शरदः सुवर्चा वसूनि चार्ये विभजासि जीवन् ॥ ६ ॥

सोमोऽददद्गन्धर्वाय गन्धर्वोऽददग्नये ।
रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमाम् ॥ ७ ॥

प्र मे पति यानः पन्थाः कल्पताम् ।
शिवा अरिष्टा पतिलोकं गमेयम् ॥ ८ ॥

प्रास्याः पति यानः पन्थाः कल्पताम् ।
शिवा अरिष्टा पतिलोकं गम्याः ॥ ९ ॥

अग्निरेतु प्रथमो देवताभ्यः सोऽस्यै प्रजां मुञ्चतु मृत्युपाशात् ।
तदयं राजा वरुणोऽनुमन्यतां यथेयं स्त्री पौत्रमघं न रोदात् स्वाहा ॥ १० ॥

इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै जरदष्टिं कृणोतु ।
अशून्योपस्था जीवतामस्तु माता पौत्रमानन्दमभि विबुध्यतामियं
स्वाहा ॥ ११ ॥

द्यौस्ते पृष्ठं रक्षतु वायुरूरू अश्विनौ च स्तनन्धयांस्ते पुत्रान् सविता-
ऽभिरक्षतु ।
आ वाससः परिधानाद् बृहस्पतिर्विश्वे देवा अभिरक्षन्तु पश्चात्
स्वाहा ॥ १२ ॥

मा ते गृहेषु निशि घोष उत्थादन्यत्र त्वद्रुदत्यः संविशन्तु ।

मा त्वं रुदत्युर आवधिष्ठा जीवपत्नी पतिलोकं विराज
पश्यन्ती प्रजां सुमनस्यमानां स्वाहा ॥ १३ ॥

अप्रजस्यं पौत्रमर्त्यं पाप्मानमुत वा अघम् ।
शीर्ष्णः स्रजमिवोन्मुच्य द्विषद्भ्यः प्रतिमुञ्चामि पाशं स्वाहा ॥ १४ ॥

परैतु मृत्युरमृतं म आगाद् वैवस्वतो नो अभयं कृणोतु
परं मृत्यो अनु परेहि पन्थां यत्र नो अन्य इतरो देवयानात् ।
चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजां रीरिषो मोत वीरान् स्वाहा ॥ १५ ॥

द्वितीयः खण्डः

इममश्मानमारोहाश्मेव त्वं स्थिरा भव ।
द्विषन्तमपबाधस्व मा च त्वं द्विषतामधः ॥ १ ॥

इयं नार्युपब्रूतेऽग्नौ लाजानावपन्ती ।
दीर्घायुरस्तु मे पतिः शतं वर्षाणि जीवतु ।
एधन्तां ज्ञातयो मम स्वाहा ॥ २ ॥

अर्यमणं नु देवं कन्या अग्निमयक्षत ।
स इमां देवो अर्यमा प्रेतो मुञ्चातु मामुतः स्वाहा ॥ ३ ॥

पूषणं नु देवं कन्या अग्निमयक्षत ।
स इमां देवः पूषा प्रेतो मुञ्चातु मामुतः स्वाहा ॥ ४ ॥

कन्यला पितृभ्यः पतिलोकं यतीयमप दीक्षामयष्ट ।
कन्या उत त्वया वयं धारा उदन्या इवाति गाहेमहि द्विषः ॥ ५ ॥

एकमिषे विष्णुस्त्वा नयतु ॥
द्वे ऊर्जे विष्णुस्त्वा नयतु ॥
त्रीणि व्रताय विष्णुस्त्वा नयतु ॥
चत्वारि मायोभवाय विष्णुस्त्वा नयतु ॥
पञ्च पशुभ्यो विष्णुस्त्वा नयतु ॥
षड् रायस्पोषाय विष्णुस्त्वा नयतु ॥
सप्त सप्तभ्यो होत्राभ्यो विष्णुस्त्वा नयतु ॥ ६-१२ ॥

सखा सप्तपदी भव सख्यं ते गमेयम् ।
सख्यं ते मा योषाः सख्यं ते मायोष्ठाः ॥ १३ ॥

सुमङ्गलीरियं वधूरिमां समेत पश्यत ।
सौभाग्यमस्यै दत्त्वायाथास्तं विपरेतन ॥ १४ ॥

समञ्जन्तु विश्वे देवाः समापो हृदयानि नौ ।
सं मातरिश्वा सं धाता समु देष्ट्री दधातु नौ ॥ १५ ॥

गृभ्णामि ते सौभगत्वाय हस्तं, मया पत्या जरदष्टिर्यथाऽसः ।
भगो अर्यमा सविता पुरन्धिः, मह्यं त्वाऽदुर्गार्हपत्याय देवाः ॥ १६ ॥

अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः
वीरसूर्जीवसूर्देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे ॥ १७ ॥

आ नः प्रजां जनयतु प्रजापतिः, आजरसाय समनक्त्वर्यमा ।
अदुर्मङ्गलीः पतिलोकमा विश, शं नो भव द्विपदे शं चतुष्पदे ॥ १८ ॥

इमां त्वमिन्द्र मीढ्वः सुपुत्रां सुभगां कृधि ।
दशास्यां पुत्रानाधेहि पतिमेकादशं कुरु ॥ ॥ १९ ॥

सम्राज्ञी श्वशुरे भव, सम्राज्ञी श्वश्र्वां भव ।
ननान्दरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु ॥ ॥ २० ॥

मम व्रते ते हृदयं दधातु मम चित्तमनु चित्तं ते अस्तु ।
मम वाचमेकमना जुषस्व बृहस्पतिस्त्वा नियुनक्तु मह्यम् ॥ २१ ॥

तृतीयः खण्डः

लेखासन्धिषु पक्ष्मस्वावर्तेषु च यानि ते ।
तानि ते पूर्णाहुत्या सर्वाणि शमयाम्यहम् ॥ ॥ १ ॥

केशेषु यच्च पापकमीक्षिते रुदिते च यत् ।
तानि ते पूर्णाहुत्या सर्वाणि शमयाम्यहम् ॥ ॥ २ ॥

शीलेषु यच्च पापकं भाषिते हसिते च यत् ।
तानि ते पूर्णाहुत्या सर्वाणि शमयाम्यहम् ॥ ॥ ३ ॥

आरोकेषु च दन्तेषु हस्तयोः पादयोश्च यत् ।
तानि ते पूर्णाहुत्या सर्वाणि शमयाम्यहम् ॥ ॥ ४ ॥

ऊर्वोरुपस्थे जङ्घयोः सन्धानेषु च यानि ते ।
तानि ते पूर्णाहुत्या सर्वाणि शमयाम्यहम् ॥ ॥ ५ ॥
यानि कानि च घोराणि सर्वाङ्गेषु तवाभवन् ।
पूर्णाहुतिभिराज्यस्य सर्वाणि तान्यशीशमम् स्वाहा ॥ ॥ ६ ॥
ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवं विश्वमिदं जगत् ।
ध्रुवासः पर्वता इमे ध्रुवा स्त्री पतिकुले इयम ॥ ॥ ७ ॥
अन्नपाशेन मणिना प्राणसूत्रेण पृश्निना ।
बध्नामि सत्यग्रन्थिना मनश्च हृदयं च ते ॥ ॥ ८ ॥
यदेतद्धृदयं तव तदस्तु हृदयं मम ।
यदिदं हृदयं मम तदस्तु हृदयं तव ॥ ॥ ९ ॥
अन्नं प्राणस्य षड्विंशस्तेन बध्नामि त्वासौ ॥ १० ॥
सुकिंशुकं शल्मलिं विश्वरूपं, सुवर्णवर्णं सुकृतं सुचक्रम् ।
आ रोह सूर्ये अमृतस्य नाभिं, स्योनं पत्ये वहतुं कृणुष्व ॥ ११ ॥
मा विदन् परिपन्थिनो य आसीदन्ति दम्पती ।
सुगेभिर्दुर्गमतीतामप द्रान्त्वरातयः ॥ १२ ॥
इह गावः प्रजायध्वमिहाश्वा इह पूरुषाः ।
इहो सहस्रदक्षिणोऽपि पूषा निषीदतु ॥ १३ ॥
इह धृतिरिह स्वधृतिरिह रन्तिरिह रमस्व ।
मयि धृतिर्मयि स्वधृतिर्मयि रमो मयि रमस्व ॥ १४ ॥

— ★ —

चतुर्थः खण्डः

अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ।
ब्राह्मणस्त्वा नाथकाम उपधावामि, याऽस्याः पापी लक्ष्मीस्तामस्या
अपजहि ॥ १ ॥

वायो प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ।
ब्राह्मणस्त्वा नाथकाम उपधावामि, याऽस्याः पतिघ्नी तनूस्तामस्या
अपजहि ॥ २ ॥

चन्द्र प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ।
ब्राह्मणस्त्वा नाथकाम उपधावामि, याऽस्या अपुत्र्या तनूस्तामस्या
अपजहि ॥ ३ ॥

सूर्य प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ।
ब्राह्मणस्त्वा नाथकाम उपधावामि, याऽस्या अपशव्या तनूस्तामस्या
अपजहि ॥ ४ ॥

अग्निवायुचन्द्रसूर्याः प्रायश्चित्तयो, यूयं देवानां प्रायश्चित्तयः स्थ ।
ब्राह्मणो वो नाथकाम उपधावामि, याऽस्याः पापी लक्ष्मीर्या पतिघ्नी
याऽपुत्र्या याऽपशव्या तनूस्ताऽस्या अपहत ॥ ५ ॥

विष्णुर्योनिं कल्पयतु, त्वष्टा रूपाणि पिंशतु ।
आ सिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते ॥ ६ ॥
गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति ।

गर्भं ते अश्विनौ देवावा धत्तां पुष्करस्रजौ ॥ ७ ॥

पुमांसौ मित्रावरुणौ पुमांसावश्विनावुभौ ।
पुमानग्निश्च वायुश्च पुमान् गर्भस्तवोदरे ॥ ८ ॥

पुमानग्निः पुमानिन्द्रः पुमान् देवो बृहस्पतिः ।
पुमांसं पुत्रं विन्दस्व तं पुमाननु जायताम् ॥ ९ ॥

पञ्चमः खण्डः

अयमूर्जावतो वृक्ष ऊर्जीव फलिनी भव ।
पर्णं वनस्पते नुत्वा नुत्वा सूयतां रयिः ॥ १ ॥

येनादितेः सीमानं नयति प्रजापतिर्महते सौभगाय ।
तेनाहमस्यै सीमानं नयामि प्रजामस्यै जरदष्टिं कृणोमि ॥ २ ॥

राकामहं सुहवां सुष्टुती हुवे शृणोतु नः सुभगा बोधतु त्मना ।
सीव्यत्वपः सूच्याऽछिद्यमानया ददातु वीरं शतदायमुक्थ्यम् ॥ ३ ॥

यास्ते राके सुमतयः सुपेशसो याभिर्ददासि दाशुषे वसूनि ।
ताभिर्नो अद्य सुमना उपागहि सहस्रपोषं सुभगे रराणा ॥ ४ ॥

किं पश्यसि प्रजां पशून् सौभाग्यं मह्यं दीर्घायुष्ट्वं पत्युः ॥ ५ ॥

या तिरश्ची निपद्यते अहं विधरणी इति ।
तां त्वा घृतस्य धारया यजे संराधनीमहम् ।

संराधन्यै देव्यै देष्ट्र्यै स्वाहा ॥ ६ ॥

विपश्चित् पुच्छमभरत्तद्धाता पुनराहरत् ।
परेहि त्वं विपश्चित् पुमानयं जनिष्यतेऽसौ नाम ॥ ७ ॥

इयमाज्ञे दमन्नमिदमायुरिदममृतम् ॥ ८ ॥

मेधां ते मित्रावरुणौ मेधामग्निर्दधातु ते ।
मेधां ते अश्विनौ देवावाधत्तां पुष्करस्रजौ ॥ ९ ॥

यत्ते सुसीमे हृदयं हितमन्तः प्रजापतौ
वेदाहं मन्ये तद्ब्रह्म माहं पौत्रमघं नियाम् ॥ १० ॥

यत् पृथिव्या अनामृतं दिवि चन्द्रमसि श्रितम् ।
वेदामृतस्याहं नाम माहं पौत्रमघं रिषम् ॥ ११ ॥

इन्द्राग्नी शर्म यच्छतं प्रजायै मे प्रजापती ।
यथायं न प्रमीयेत पुत्रो जनित्र्या अधि ॥ १२ ॥

यददश्चन्द्रमसि कृष्णं पृथिव्या हृदयं श्रितम् ।
तदहं विद्वांस्तत् पश्यन् माहं पौत्रमघं रुदम् ॥ १३ ॥

कोऽसि कतमोऽस्येषोऽस्यमृतोऽसि ।
आहस्पत्यं मासं प्रविशासौ ॥ १४ ॥

स त्वाह्ने परिददात्वहस्त्वा रात्र्यै परिददातु, रात्रिस्त्वाहोरात्राभ्यां

परिददात्वहोरात्रौ त्वार्धमासेभ्यः परिददात्वर्धमासास्त्वा मासेभ्यः
परिददतु मासास्त्वर्तुभ्यः परिददत्वृतवस्त्वा संवत्सराय परिददतु,
संवत्सरस्त्वायुषे जरायै परिददात्वसौ ॥ १५ ॥

अङ्गादङ्गात् संभवसि हृदयादधि जायसे ।
प्राणन्ते प्राणेन सन्दधामि जीव मे यावदायुषम् ॥ १६ ॥

अङ्गादङ्गात् सम्भवसि हृदयादधि जायसे ।
वेदो वै पुत्रनामासि स जीव शरदः शतम् ॥ १७ ॥

अश्माभव परशुर्भव हिरण्यमस्तृतं भव ।
आत्मासि पुत्र मा मृथाः स जीव शरदः शतम् ॥ १८ ॥

पशूनां त्वा हिङ्कारेणाभिजिघ्राम्यसौ ॥ १९ ॥

षष्ठः खण्डः

आयमगात् सविता क्षुरेण ॥ १ ॥
उष्णेन वाय उदकेनेधि ॥ २ ॥
आप उन्दन्तु जीवसे ॥ ३ ॥
विष्णोर्दंष्ट्रोऽसि ॥ ४ ॥
ओषधे त्रायस्वैनम् ॥ ५ ॥
स्वधिते मैनं हिंसीः ॥ ६ ॥

येन पूषा बृहस्पतेर्वायोरिन्द्रस्य चावपत् ।
तेन ते वपामि ब्रह्मणा जीवातवे जीवनाय दीर्घायुष्ट्वाय वर्चसे ॥ ७ ॥

त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुष मगस्त्यस्य त्र्यायुषं यद्देवानां
त्र्यायुषं तत्ते अस्तु त्र्यायुषम् ॥ ८ ॥

अग्ने व्रतपते व्रतं चरिष्यामि, तत्ते प्रब्रवीमि तच्छकेयम् ।
तेनर्ध्यासमिदमहमनृतात् सत्यमुपैमि स्वाहा ॥ ९ ॥

वायो व्रतपते व्रतं चरिष्यामि, तत्ते प्रब्रवीमि तच्छकेयम् ।
तेनर्ध्यासमिदमहमनृतात् सत्यमुपैमि स्वाहा ॥ १० ॥

सूर्य व्रतपते व्रतं चरिष्यामि, तत्ते प्रब्रवीमि तच्छकेयम् ।
तेनर्ध्यासमिदमहमनृतात् सत्यमुपैमि स्वाहा ॥ ११ ॥

चन्द्र व्रतपते व्रतं चरिष्यामि, तत्ते प्रब्रवीमि तच्छकेयम् ।
तेनर्ध्यासमिदमहमनृतात् सत्यमुपैमि स्वाहा ॥ १२ ॥

व्रतानां व्रतपते व्रतं चरिष्यामि, तत्ते प्रब्रवीमि तच्छकेयम् ।
तेनर्ध्यासमिदमहमनृतात् सत्यमुपैमि स्वाहा ॥ १३ ॥

आगन्त्रा समगन्महि प्र सुमर्त्यं युयोतन ।
अरिष्टाः सञ्चरेमहि स्वस्ति चरतादयम् ॥ १४ ॥

अग्निष्टे हस्तमग्रहीत् सविता हस्तमग्रहीदर्यमा
हस्तमग्रहीन्मित्रस्त्वमसि कर्मणाग्निराचार्यस्तव ॥ १५ ॥

ब्रह्मचर्यमागामुप मा नयस्व ॥ १६ ॥

को नामासि ॥ १७ ॥ असौ नामास्मि ॥ १८ ॥

देवस्य ते सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो

हस्ताभ्यां हस्तं गृह्णाम्यसौ ॥ १९ ॥

सूर्यस्यावृतमन्वावर्तस्वासौ ॥ २० ॥

प्राणानां ग्रन्थिरसि मा विस्रसः । अन्तक इदं ते परिददाम्यमुम् ॥ २१ ॥

अहुर इदन्ते परिददाम्यमुम् ॥ २२ ॥

कृशन इदन्ते परिददाम्यमुम् ॥ २३ ॥

प्रजापतये त्वा परिददाम्यसौ ॥ २४ ॥

देवाय त्वा सवित्रे परिददाम्यसौ ॥ २५ ॥

ब्रह्मचार्यस्यसौ ॥ २७ ॥

समिधमाधेह्यपोऽशान कर्म कुरु मा दिवा स्वाप्सीः ॥ २७ ॥

इयं दुरुक्तात् परिबाधमाना वर्णं पवित्रं पुनती न आगात् ।

प्राणापानाभ्यां बलमाहरन्ती स्वसा देवी सुभगा मेखलेयम् ॥ २८ ॥

ऋतस्य गोप्त्री तपसः परस्वी घ्नती रक्षः सहमाना अरातीः ।

सा मा समन्तमभि पर्येहि भद्रे धर्तारस्ते मेखले मा रिषाम ॥ २९ ॥

तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।

धियो यो नः प्रचोदयात् ॥ ३० ॥

भूर्भुवः स्वरोम् ॥ ३१ ॥

सुश्रवः सुश्रवसं मा कुरु यथा त्वं सुश्रवः सुश्रवाः ।
देवेष्वेवमहं सुश्रवः सुश्रवा ब्राह्मणेषु भूयासम् ॥ ३२ ॥

अग्नये समिधमाहार्षं बृहते जातवेदसे । यथा त्वमग्ने
समिधा समिध्यस एवमहमायुषा मेधया वर्चसा प्रजया
पशुभिर्ब्रह्मवर्चसेन धनेनान्नाद्येन समेधिषीय स्वाहा ॥ ३३ ॥

पुनर्मामैत्विन्द्रियं पुनरायुः पुनर्भगः ।
पुनर्द्रविणमैतु मा पुनर्ब्राह्मणमैतु मा ॥ ३४ ॥

पुनर्मनः पुनरात्मा म आगात् पुनश्चक्षुः पुनः श्रोत्रं म आगात् ।
पुनः प्राणः पुनराधीतं म आगात् ।
वैश्वानरो अदब्धस्तनूपा अन्तस्तिष्ठतु मे मनोऽमृतस्य केतुः
स्वाहा ॥ ३५ ॥

सप्तम खण्डः

ये अप्स्वन्तरग्नयः प्रविष्टा गोह्य उपगोह्यो मरूको मनोहाः ।
खलो विरुजस्तनूदूषिरिन्द्रियहा अति तान्सृजामि ॥ १ ॥
यदपां घोरं यदपां क्रूरं यदशान्तमशान्तमति तत् सृजामि ॥ २ ॥
यो रोचनस्तमिह गृह्णामि तेनाहं मामभिषिञ्चामि ॥ ३ ॥

यशसे तेजसे ब्रह्मवर्चसाय बलायेन्द्रियाय वीर्यायान्नाद्याय

रायस्पोषाय त्विष्या अपचित्यै ॥ ४ ॥

येन श्रियमकृणुतां येनापमृशतां सुराम् ।

येनाक्षानभ्यषिञ्चतां येनेमां पृथिवीं महीम् ॥

यद्वां तदश्विना यशस्तेन मामभिषिञ्चतम् ॥ ५ ॥

उद्यन्भ्राजभृष्णुभिरिन्द्रो मरुद्भिरस्थात् प्रातर्यावभिरस्थात् । ॥

दशसनिरसि दशसनिं मा कुर्वा त्वा विशाम्या मा विश ॥ ६ ।

उद्यन्भ्राजभृष्णुभिरिन्द्रो मरुद्भिरस्थात् सान्तपनेभिरस्थात् ।

शतसनिरसि शतसनिं मा कुर्वा त्वा विशाम्या मा विश ॥ ७ ॥

उद्यन्भ्राजभृष्णुभिरिन्द्रो मरुद्भिरस्थात् सायंयावभिरस्थात् ।

सहस्रसनिरसि सहस्रसनिं मा कुर्वा त्वा विशाम्या मा विश ॥ ८ ॥

चक्षुरसि चक्षुष्ट्वमस्यव मे पाप्मानं जहि ।

सोमस्त्वा राजाऽवतु नमस्तेऽस्तु मा मा हिंसीः ॥ ९ ॥

उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय ।

अथादित्यव्रते वयं तवानागसो अदितये स्याम ॥ १० ॥

श्रीरसि मयि रमस्व ॥ ११ ॥

नेत्र्यौ स्थो नयतं माम् ॥ १२ ॥

गन्धर्वोऽभ्युपाव उप मामव ॥ १३ ॥

यक्षमिव चक्षुषः प्रियो वो भूयासम् ॥ १४ ॥

ओष्ठापिधाना नकुली दन्तपरिमितः पविः ।
जिह्वे मा विह्वलो वाचं चारु माऽद्येह वादय ॥ १५ ॥

वनस्पते वीड्वङ्गो हि भूया अस्मत्सखा प्रतरणः सुवीरः ।
गोभिः सन्नद्धो असि वीडयस्वास्थाता ते जयतु जेत्वानि ॥ १६ ॥

अष्टमः खण्डः

इमा मे विश्वतोवीर्यो भव इन्द्रश्च रक्षतम् ।
पूषंस्त्वं पर्यावर्तयानष्टा आयन्तु नो गृहान् ॥ १ ॥

इमा मधुमतीर्मह्यमनष्टाः पयसा सह ।
गाव आज्यस्य मातर इहेमाः सन्तु भूयसीः ॥ २ ॥

गवां श्लेष्मासि गावो मयि श्लिष्यन्तु ॥ ३ ॥

संग्रहण संगृहाण ये जाताः पशवो मम ।
पूषैषां शर्म यच्छतु यथा जीवन्तो अप्ययात् ॥ ४ ॥

भुवनमसि साहस्रमिन्द्राय त्वा सृमोऽददादक्षतमरिष्टमिलान्दम् ।
गोपोषणमसि गोपोषस्येशिषे गोपोषाय त्वा सहस्रपोषणमसि
सहस्रपोषस्येशिषे सहस्रपोषाय त्वा ॥ ५ ॥

लोहितेन स्वधितिना मिथुनं कर्णयोः कृतम् ।
यावतीनां यावतीनां व ऐषमो लक्षणमकारिषम् ।
भूयसीनां भूयसीनां व उत्तरामुत्तरां समां क्रियासम् ॥ ६ ॥

इयं तन्ती गवां माता सवत्सानां निवेशनी ।
सा नः पयस्वती दुहा उत्तरामुत्तरां समाम् ॥ ७ ॥

॥ समाप्तोऽयं प्रथमः प्रपाठकः ॥

॥ अथ द्वितीयः प्रपाठकः ॥

प्रथमः खण्डः

यः प्राच्यां दिशि सर्पराज एष ते बलिः ॥ १ ॥
यो दक्षिणस्यां दिशि सर्पराज एष ते बलिः ॥ २ ॥
यः प्रतीच्यां दिशि सर्पराज एष ते बलिः ॥ ३ ॥
य उदीच्यां दिशि सर्पराज एष ते बलिः ॥ ४ ॥

नमः पृथिव्यै दंष्ट्राय विश्वभृन्मा ते अन्ते रिषाम ।
संहृतं मा नि वधीर्विहृतं माऽभि सं वधीः ॥ ५ ॥

सोमो राजा सोमस्तम्भो राजा सोमोऽस्माकं राजा सोमस्य वयं स्मः ।
अहिजम्भनमसि सौमस्तम्बं सौमस्तम्बमहिजम्भनमसि ॥ ६ ॥

यां सत्र्यां समधत्त यूयं सप्तऋषिभिः सह ।
~~ता~~ सपो माऽत्यक्रामिष्ट नमो वो अस्तु मा नो हिंसिष्ट ॥ ७ ॥

मा नस्तोके तनये मा न आयौ मा नो गोषु मानो अश्वेषु रीरिषः ।
वीरान् मा नो रुद्र भामितो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥ ८ ॥

शतायुधाय शतवीर्याय शतोतयेऽभिमातिषाहे
शतं यो नः शरदो अजीजादिन्द्रो नेषदति दुरितानि विश्वा स्वाहा ॥ ९ ॥

ये चत्वारः पथयो देवयाना अन्तरा द्यावापृथिवी वियन्ति ।
तेषां यो अज्यानिमजीजिमावहात्तस्मै नो देवाः परिदत्तेह सर्वे स्वाहा ॥
॥ १० ॥

ग्रीष्मो हेमन्त उत नो वसन्तः शरद्वर्षाः सुवितं नो अस्तु ।
तेषामृतूनां शतशारदानां निवात एषामभये स्याम ॥ ११ ॥

इद्वत्सराय परिवत्सराय संवत्सराय कृणुता बृहन्नमः ।
तेषां वयं सुमतौ यज्ञियानां ज्योग्जीता अहताः स्याम ॥ १२ ॥

भद्रान्नः श्रेयः समनैष्ट देवास्त्वयावसेन समशीमहि त्वा ।
स नो मयोभूः पितेवा विशस्व शं तोकाय तन्वे स्योनः स्वाहा ॥ १३ ॥

अस्मोऽसि प्राण तदृतं ब्रवीम्यमा ह्यसि सर्वमनुप्रविष्टः ।
स मे जरां रोगमपनुद्य शरीरादपाम एधि मा मृथा न इन्द्र ॥ १४ ॥

अग्निः प्राश्नातु प्रथमः स हि वेद यथा हविः ।
शिवा अस्मभ्यमोषधीः कृणोतु विश्वचर्षणिः स्वाहा ॥ १५ ॥

एतमुत्यं मधुना संयुतं यवं सरस्वत्या अधिवनावचकृषुः ।
इन्द्र आसीत् सीरपतिः शतक्रतुः कीनाशा आसन्मरुतः सुदानवः
स्वाहा ॥ १६ ॥

द्वितीयः खण्डः

प्रथमा ह व्युवास सा धेनुरभवद्यमे ।
सा नः पयस्वती दुहा उत्तरामुत्तरां समाम् ॥ १ ॥

प्रति क्षत्रे प्रति तिष्ठामि राष्ट्रे प्रत्यश्वेषु प्रति तिष्ठामि गोषु ।
प्रति प्राणे प्रति तिष्ठामि पुष्टौ प्रत्यङ्गेषु प्रति तिष्ठाम्यात्मनि । ॥ २ ॥

प्रति द्यावापृथिव्योः प्रति तिष्ठामि यज्ञे ॥ ३ ॥

स्योना पृथिवि नो भवानृक्षरा निवेशनी ।
यच्छा नः शर्म सप्रथो देवान् मा भयादिति ॥ ४ ॥

यत् पशवः प्रध्यायत मनसा हृदयेन च ।
वाचा सहस्रपाशया मयि बध्नामि वो मनः ॥ ५ ॥

अनु त्वा माता मन्यतामनु पिताऽनु भ्राताऽनु
सगर्भ्योऽनु सखा सयूथ्यः ॥ ६ ॥

आर्त्तं देवेभ्यो हविः ॥ ७ ॥

यत् पशुर्मायुमकृतोरो वा पद्भिराहते ।
अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वंहसः ॥ ८ ॥

अयमग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अधिराज एषः ।
स नः स्योनः सुयजा यजेह यथा देवानां जनिमानि वेद ॥ ९ ॥

औलूखलाः सं प्रवदन्ति ग्रावाणो हविष्कृण्वन्तः परिवत्सरीणाम् ।
एकाष्टके सुप्रजसः सुवीरा ज्योग्जीवेम बलिहृतो वयं ते ॥ १० ॥

इडायास्पदं घृतवत्सरीसृपं जातवेदः प्रतिहव्या गृभाय ।
ये ग्राम्याः पशवो विश्वरूपास्तेषां सप्तानां मयि रन्तिरस्तु स्वाहा ॥ ११ ॥

एषैव सा या पूर्वा व्यौच्छत् सेयमप्स्वन्तश्चरति प्रविष्टा ।
वधूर्जिगाय प्रथमा जनित्री विश्वे ह्यस्यां महिमानो अन्तः ॥ १२ ॥

एषैव सा या प्रथमा व्यौच्छत्सा धेनुरभवद्विश्वरूपा ।
संवत्सरस्य या पत्नी सा नो अस्तु सुमङ्गली ॥ १३ ॥

यां देवाः प्रतिपश्यन्ति रात्रीं धेनुमिवायतीम् ।
सा नः पयस्वती दुहा उत्तरामुत्तरां समाम् ॥ १४ ॥

संवत्सरस्य प्रतिमां यां त्वा रात्रि यजामहे ।
प्रजामजर्यां नः कुरु रायस्पोषेण सं सृज ॥ १५ ॥

अन्विमं नो अनुमतिर्यज्ञं देवेषु मन्यताम् ।

अग्निश्च हव्यवाहनः स नो दाद्दाशुषे मयः ॥ १६ ॥

तृतीयः खण्डः

स्वाहा सोमाय पितृमते ॥ १ ॥

स्वाहाऽग्नये कव्यवाहनाय ॥ २ ॥

अपहता असुरा रक्षांसि वेदिषदः ॥ ३ ॥

ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चरन्ति ।

परा पुरो नि पुरो ये भरन्त्यग्निष्टाँल्लोकात् प्रणुदात्वस्मात् ॥ ४ ॥

एत पितरः सोम्यासो गम्भीरेभिः पथिभिः पूर्विणेभिः ।

दत्तास्मभ्यं द्रविणेह भद्रं रयिञ्च नः सर्ववीरं नियच्छत ॥ ५ ॥

अत्र पितरो मादयध्वं यथाभागमावृषायध्वम् ॥ ६ ॥

अमीमदन्त पितरो यथाभागमावृषायिषत ॥ ७ ॥

नमो वः पितरो जीवाय नमो वः पितरः शूषाय ॥ ८ ॥

नमो वः पितरो घोराय नमो वः पितरो रसाय ॥ ९ ॥

नमो वः पितरः स्वधायै नमो वः पितरो मन्यवे ॥ १० ॥

नमो वः पितरः पितरो नमो वः ॥ ११ ॥

गृहान्नः पितरो दत्त ॥ १२ ॥

सद्रो वः पितरो देष्म ॥ १३ ॥

एतद्वः पितरो वासः ॥ १४ ॥

ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम् ।
स्वधा स्थ तर्पयत मे पितॄन् ॥ १५ ॥

आधत्त पितरो गर्भं कुमारं पुष्करस्रजम् ।
यथेह पुरुषः स्यात् ॥ १६ ॥

अभून्नो दूतो हविषो जातवेदा अवाड्ढव्यानि सुरभीणि कृत्वा ।
प्रादात् पितृभ्यः स्वधया ते अक्षन् प्रजानन्नग्ने पुनरेहि योनिम् ॥ १७ ॥

वह वपां जातवेदः पितृभ्यो यत्रैतान् वेत्थ निहितान् पराचः ।
मेदसः कुल्या अभि तान्त्स्रवन्तु सत्या एषामाशिषः सन्तु कामात्
स्वाहा ॥ १८ ॥

जातवेदो वपया गच्छ देवांस्त्वं हि होता प्रथमो बभूव ।
सत्या वपा प्रगृहीता मे अस्तु समृध्यतां मे यदिदं करोमि ॥ १९ ॥

यत्कुसीदमप्रदत्तं मयेह येन यमस्य निधिना चराणि ।
इदं तदग्ने अनृणो भवामि जीवन्नेव प्रति तत्ते ददामि ॥ २० ॥

एकाष्टका तपसा तप्यमाना जजान गर्भं महिमानमिन्द्रम् ।
तेन देवा असहन्त शत्रून्हन्तासुराणामभवच्छचीभिः ॥ २१ ॥

चतुर्थः खण्डः

इदं भूमेर्भजामह इदं भद्रं सुमङ्गलम् ।
परा सपत्नान् बाधस्वान्येषां विन्दते वसवन्येषां विन्दते वनं ॥ १ ॥

इमं स्तोममर्हते जातवेदसे रथमिव सं महेमा मनीषया ।
भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयन्तव ॥ २ ॥

भरामेध्मं कृणवामा हवींषि ते चितयन्तः पर्वणापर्वणा वयम् ।
जीवातवे प्रतरां साधया धियोऽग्ने सख्ये मा रिषामा वयन्तव ॥ ३ ॥

शकेम त्वा समिधं साधया धियस्त्वे देवा हविरदन्त्याहुतम् ।
त्वमादित्याँ आवह तान् ह्युश्मस्यग्ने सख्ये मा रिषमा वयन्तव ॥ ४ ॥

पवित्रे स्थो वैष्णव्यौ (भाष्यकाराः)

विष्णोर्मनसा पूते स्थः ,,

देवस्त्वा सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः ,,

तपश्च तेजश्च श्रद्धा च ह्रीश्च सत्यञ्चाक्रोधश्च, त्यागश्च धृतिश्च धर्मश्च सत्त्वञ्च वाक् च मनश्चात्मा च ब्रह्म च तानि प्रपद्ये तानि मामवन्तु भूर्भुवः स्वरों महान्तमात्मानं प्रपद्ये ॥ ५ ॥

विरूपाक्षोऽसि दन्ताञ्जिस्तस्य ते शय्या पर्णे गृहा अन्तरिक्षे विमितं हिरण्मयम् । तद्देवानां हृदयान्ययस्मये कुम्भेऽन्तः सन्निहितानि । तानि बलभृच्च बलसाच्च रक्षतोऽप्रमणी अनिमिषतः सत्यम् ।

यद्वै द्वादश पुत्रास्ते त्वा संवत्सरे संवत्सरे कामप्रेण यज्ञेन याजयित्वा पुनर्ब्रह्म चर्यमुपयन्ति । त्वं देवेषु ब्राह्मणोऽस्यहं मनुष्येषु । ब्राह्मणो वै ब्राह्मणमुप धाव.युप त्वा धावामि । जपन्तं मा मा प्रति जापीर्जुह्वन्तं मा मा प्रति हौषीः कुर्वन्तं मा मा प्रति कार्षीः । त्वां प्रपद्ये । त्वया प्रसूत इदं कर्म करिष्यामि । तन्मे राध्यतां तन्मे समृध्यतां तन्म उप पद्यताम् । समुद्रो मा विश्वव्यचा ब्रह्माऽनु जानातु तुथो मा विश्ववेदा ब्रह्मणः पुत्रोऽनु जानातु श्वात्रो मा प्रचेता मैत्रावरुणोऽनु जानातु। तस्मै विरूपाक्षाय दन्ताञ्जये समुद्राय विश्वव्यचसे तुथाय विश्ववेदसे श्वात्राय प्रचेतसे सहस्राक्षाय ब्रह्मणः पुत्राय नमः ॥ ६ ॥

अक्तं रिहाणा व्यन्तु वयः (भाष्यकारः)

यः पशूनामधिपती रुद्रस्तन्तिचरो वृषा ।

पशूनस्माकं मा हिंसीरेतदस्तु हुतं तव स्वाहा ,,

सहस्रबाहुर्गौपत्यः स पशूनभि रक्षतु ।

मयि पुष्टिं पुष्टिपतिर्दधातु मयि प्रजां प्रजापतिः स्वाहा ॥ ७ ॥

कौतोमतं संवननं सुभागंकरणं मम ।

नाकुली नाम ते माताऽथाहं पुरुषानयः ।

यन्नौ कामस्य विच्छिन्नं तन्नौ सं धेह्योषधे ॥ ८ ॥

वृक्ष इव पक्वस्तिष्ठसि सर्वान् कामान् भुवस्पते ।
यस्त्वैवं वेद तस्मै मे भोगान् धुक्ष्वाक्षतान् बृहन् ॥ ९ ॥

ऋतं सत्ये प्रतिष्ठितं भूतं भविष्यता सह ।
आकाश उप नि रज्जतु मह्यमन्नमथो श्रियम् ॥ १० ॥

अभिभगोऽसि सर्वस्मिंस्तद् सर्वं त्वयि श्रितम् ।
तेन सर्वेण सर्वो मा विवासन् वि वासय ॥ ११ ॥

कोश इव पूर्णो वसुना त्वं प्रीतो ददसे धनम् ।
अदृष्टो दृष्टमा भर सर्वान् कामान् प्र यच्छ मे ॥ १२ ॥

आकाशस्यैष आकाशो यदेतद्भाति मण्डलम् ।
एवं त्वा वेद यो वेदेशानेशान् प्र यच्छ मे ॥ १३ ॥

भूर्भुवः स्वरों सूर्य इव दृशे भूयासमग्निरिव तेजसा वायुरिव प्राणेन
सोम इव गन्धेन बृहस्पतिरिव बुद्ध्याऽश्विनाविव रूपेणेन्द्राग्नी इव
बलेन ब्रह्मभाग एवाहं भूयासं पाप्मभागा मे द्विषन्तः ॥ १४ ॥

पञ्चमः खण्डः

मूर्ध्नोऽधि मे वैश्रवणाङ्गिरसोऽनुप्रवेशिनः ।
कर्णाच्छिद्रस्कान् घोरान् विघनान् वि वृहामि वः स्वाहा ॥ १ ॥

ग्रीवाभ्यो मे स्कन्धाभ्यां मे नस्तो मेऽनुप्रवेशिनः ।
मुखान्मे बद्धदान् घोरान् विषनान् वि वृहामि वः स्वाहा ॥ २ ॥
बाहुभ्यां मे यतो यनः पार्श्वयोरुत् तानधि ।
उरस्तो बद्धदान घोरान् विषनान् वि वृहामि वः स्वाहा ॥ ३ ॥
वङ्क्षणाभ्यां मे लोहितादान् योनिहान् पत्निहानधि ।
ऊरुभ्यां निक्लिषो घोरान् विषनान् वि वृहामि वः स्वाहा ॥ ४ ॥
जङ्घाभ्यां मे यतो यनः पार्ष्ण्योरुत्त तानधि ।
पादयोर्विकिरान् घोरान् विषनान् वि वृहामि वः स्वाहा ॥ ५ ॥
परिबाधं यजामहेऽणजङ्घं शबलोदरम् ।
यो नोऽयं परिबाधते दानाय भगाय च स्वाहा ॥ ६ ॥
अपेहि त्वं परिबाध मा विबाध वि बाधथाः
सुगं पन्थानं मे कुरु येन मा धनमेष्यति स्वाहा ॥ ७ ॥
प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव ।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम् स्वाहा ॥ ८ ॥
यशोऽहं भवामि ब्राह्मणानां यशो राज्ञां यशो विशाम् ।
यशः सत्यस्य भवामि भवामि यशसां यशः ॥ ९ ॥
पुनर्मां यन्तु देवता या मदपचक्रमुः ।
महस्वन्तो महान्तो भवाम्यस्मिन् पात्रे हरिते सोमपृष्ठं ॥ १० ॥

रूप रूपं मे दिश प्रातरह्नस्य तेजसः ।
अन्नमुग्रस्य प्राशिषमस्तु वै मयि त्वयीदमस्तु त्वयि मयीदम् ॥ ११ ॥

यदिदं पश्यामि चक्षुषा त्वया दत्तं प्रभास्वया ।
तेन मा भुञ्ज तेन भुक्षिषीय तेन मा विश ॥ १२ ॥

अहर्नो अत्यपीपरद्रात्रिर्नो अति पारयत् ।
रात्रिर्नो अत्यपीपरदहर्नो अति पारयत् ॥ १३ ॥

आदित्यनावमारोक्षं पूर्णामपरिवादिनीम् ।
अच्छिद्रां पारयिष्णुं शतारित्रां स्वस्तये ॥ १४ ॥

ओं नम आदित्याय नम आदित्याय नम आदित्याय ॥ १५ ॥

उद्यन्तं त्वादित्यानूदियासं प्रतितिष्ठन्तं त्वादित्यानुप्र ति तिष्ठासम् ॥ १६ ॥

भल्लाय स्वाहा ॥ १७ ॥

भल्लाय स्वाहा ॥ १८ ॥

षष्ठः खण्डः

वास्तोष्पते प्रतिजानीह्यस्मान्त्स्वावेशोऽनमीवो भवा नः ।
यत्त्वेमहे प्रति तन्नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे ॥ १ ॥

हये राके सिनीवालि सिनीवालि पृथुष्टुके ।
सुभद्रे पथ्ये रेवति पथो नो यश आ वह स्वाहा ॥ २ ॥

ये यन्ति प्राञ्चः पन्थानो य उ चोत्तरत आययुः ।
ये चेमे सर्वे पन्थानस्तेभिर्नो यश आ वह स्वाहा ॥ ३ ॥

यथा यन्ति प्रवतो यथा मासा अहर्जरम् ।
एवं मा श्रीधातारः समत्र यन्तु सर्वतः स्वाहा ॥ ४ ॥

यथा समुद्रं स्रवन्तीः समवयन्ति दिशो दिशः ।
एवं मा सखायो ब्रह्मचारिणः समत्र यन्तु दिशो दिशः स्वाहा ॥ ५ ॥

क्षमुवन पुषि क्षमुवन पुषि क्षमुवन पुषि ॥ ६ ॥

वशङ्गमौ देवयानौ युवं स्थो यथा युवयोः ।
सर्वाणि भूतानि वशमायन्त्येवं ममासौ वशमेतु स्वाहा ॥ ७ ॥
शङ्खश्च मन आयुश्च देवयानौ युवं स्थो यथा युवयोः ।
सर्वाणि भूतानि वशमायन्त्येवं ममासौ वशमेतु स्वाहा ॥ ८ ॥

आकूतीं देवीं मनसा प्रपद्ये यज्ञस्य मातरं सुहवा मे अस्तु ।
यस्यास्त एकमक्षरं परं सहस्रा अयुतं च शाखास्तस्यै
वाचे निहवे जुहोम्या मा श्रीर्गच्छतु श्रीर्यशश्च स्वाहा ॥ ९ ॥

इदमहमिमं विश्वकर्माणं श्रीवत्समभि जुहोमि स्वाहा ॥ १० ॥
पूर्णहोमं यशसे जुहोमि योऽस्मै जुहोति वरमस्मै ददाति ।
वरं वृणे यशसा भामि लोके स्वाहा ॥ ११ ॥

इन्द्रामवदात्तमो वः परस्तादहं वो ज्योतिर्भामभ्येत सर्वे स्वाहा ॥ १२ ॥

अन्नं वा एकं छन्दस्यमन्नं ह्येकं भूतेभ्यश्छन्दयति स्वाहा ॥ १३ ॥

श्रीर्वा एषा यत्सत्वानो विरोचनो मयि सत्वमवद्धातु स्वाहा ॥ १४ ॥

अन्नस्य घृतमेव रसस्तेजः सम्पत्कामो जुहोमि स्वाहा ॥ १५ ॥

क्षुधे स्वाहा ॥ १६ ॥ क्षुत्पिपासाभ्यां स्वाहा ॥ १७ ॥

मा मैषीर्न मरिष्यसि जरदृष्टिर्भविष्यसि । ॥ १८ ॥

रसं विषस्य नाविदमुग्रं फेनमिवास्यम् ॥ १९ ॥

तुर गोपाय मा नाथ गोपाय मा ।
अशस्तिभ्यो अरातिभ्यः स्वस्त्ययनमसि ॥ २० ॥

सप्तम खण्डः

हतस्ते अत्रिणा क्रिमिर्हतस्ते जमदग्निना ।
गोतमेन तिनीकृतोऽत्रैव त्वा क्रिमे ब्रह्मवद्यमवद्यम् ॥ १ ॥

भरद्वाजस्य मन्त्रेण सं तिनोमि क्रिमे त्वा ॥ २ ॥

क्रिमिं ह वक्रतोदिनं क्रिमिमान्त्रानुचारिणम् ।
क्रिमिं द्विशीर्षमर्जुनं द्विशीर्षं ह चतुर्हनुम् ॥ ३ ॥

हतः क्रिमीणां क्षुद्रको हता माता हतः पिता ।
अथैषां भिन्नकः कुम्भो य एषां विषधानकः ॥ ४ ॥

क्रिमिमिन्द्रस्य बाहुभ्यामवाञ्चं पातयामसि ॥ ५ ॥

हताः क्रिमयः साशातिकाः सनीलमक्षिकाः ॥ ६ ॥

अष्टमः खण्डः

अर्हणा पुत्रवाससा धेनुरभवद्यमे ।
सा नः पयस्वती दुहा उत्तरामुत्तरां समाम् ॥ १ ॥

इदमहमिमां पद्यां विराजमन्नाद्यायाधितिष्ठामि ॥ २ ॥

या ओषधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः ।
ता मह्यमस्मिन्नासनेऽच्छिद्राः शर्म यच्छत ॥ ३ ॥

या ओषधीः सोमराज्ञीर्विष्ठिताः पृथिवीमनु ।
ता मह्यमस्मिन् पादयोरच्छिद्राः शर्म यच्छत ॥ ४ ॥
यतो देवीः प्रतिपश्याम्यापस्ततो मा राद्धिरागच्छतु ॥ ५ ॥
सव्यं पादमव नेनिजेऽस्मिन् राष्ट्रे श्रियं दधे ॥ ६ ॥
दक्षिणं पादमव नेनिजेऽस्मिन् राष्ट्रे श्रियमावेशयामि ॥ ७ ॥

पूर्वमन्यमपरमन्यमुभौ पादाववनेनिजे राष्ट्रस्यर्ध्या अभयस्यावरुद्ध्यै ॥ ८ ॥

अन्नस्य राष्ट्रिरसि राष्ट्रिस्ते भूयासम् ॥ ९ ॥

यशोऽसि यशो मयि धेहि　॥ १० ॥

यशसो यशोऽसि　॥ ११ ॥

यशोमा भक्षोऽसि महसो भक्षोऽसि

श्रीभक्षोऽसि श्रियं मयि धेहि स्वाहा　॥ १२ ॥

मुञ्च गां वरुण पाशाद्द्विषन्तं मेऽभि धेहि ।

तं जहमुष्य चोभयोरुत्सृज गामत्तु तृणानि पिबतूदकम्　॥ १३ ॥

माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः ।

प्र नु वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट　॥ १४ ॥

॥ समाप्तोऽयं छान्दोग्यमन्त्रब्राह्मणम् ॥